**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) बहिःस्थ

## परीक्षा: डिसेंबर – २०२३

## सत्र ५ वे

**विषय: रत्नावली** (19E456)

| दिनांक: १२/१२/२०२३ | गुण : ८० | वेळ : स. १०.०० ते १.०० |
|---|---|---|

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. मातृभाषया चतुर्णामनुवादः करणीयः।** (२८)

१. औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताऽऽभिमुख्यं पुनः।
दृष्ट्वाऽग्रे वरमातसाध्वसरसा गौरी नवे सङ्गमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः।

२. किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नाऽलोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्ययं पदपरः शीतांशुरुज्जृम्भते दर्पः स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे।।

३. अस्त्रव्यरस्तशिरस्त्रशस्त्रकषणैः कृतोत्तमाङ्गे क्षणं व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोद्गमद्वह्निनि।
आहूयाऽजिमुखे स कोसलपतिर्भग्ने प्रधाने बले एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः।।

४. श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छित फलप्राप्तेः पदं किं पुनःमद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः।।

५. प्रसीदेति ब्रूयामिदमसति कोपे न घटते करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः।
न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे।।

**प्र.२. ससन्दर्भं चतुर्णां स्पष्टीकरणं कुरुत।** (२८)

१. रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता।

२. सखे इयमनभ्रा वृष्टिः।

३. अथवा अनङ्गोऽसि।

४. मुखरा खल्वेषा गर्भदासी।

५. भवति, न मे ईदृशे प्रस्तावे एतद्वोढुं हस्तः प्रसरति।

६. दुरवगाहा गतिर्दैवस्य।

**प्र.३. टिप्पणीद्वयं लिखत।** (२४)

१. यौगन्धरायणः

२. वृक्षदोहदम्

३. प्रस्तावना

४. नाटिका

-------------